# // नारायण सूक्तम् //

ॐ सह नाववतु । सहनौ भुनक्तु । सह वीर्यं करवावहै । तेजस्विनावधीतमस्तु । मा विद्विषावहै ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

सहस्र शीर्षं देवं विश्वाक्षं विश्व शंभुवम् । विश्वं नारायणं देवमक्षरं परमं पदम् । विश्वतः परमान्नित्यं विश्वं नारायणग्ं हरिम् । विश्वमेवेदं पुरुष-स्तद्विश्व-मुपजीवति । पतिं विश्वस्यात्मेश्वरग्ं शाश्वतग्ं शिव-मच्युतम् । नारायणं महाज्ञेयं विश्वात्मानं परायणम् । नारायणपरो ज्योतिरात्मा नारायणः परः । नारायण परं ब्रह्म तत्त्वं नारायणः परः । नारायण परो ध्याता ध्यानं नारायणः परः । यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा ॥

अंतर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः । अनंतमव्ययं कविग्ं समुद्रेऽंतं विश्व शंभुवं । पद्मकोश प्रतीकाशग्ं हृदयं चाप्यधोमुखं । अधो निष्ट्या वितस्त्यांते नाभ्यामुपरि तिष्ठति ज्वालमालाकुलं भाती विश्वस्यायतनं महत् । संततग्ं शिलाभिस्तु लंबत्याकोश सन्निभम् । तस्यांते सुषिरग्ं सूक्ष्मं तस्मिन् सर्वं प्रतिथिष्टितं । तस्य मध्ये महानग्निर्विश्वार्चि र्विश्वतोमुखः । सोऽग्र भुग्वि भजंतिष्ठ-न्नाहारमजरः कविः । तिर्यगूर्ध्व मधश्शायी रश्मयस्तस्य संतता । संतापयति स्वं देहमापाद तल मस्तकः । तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः । नीलतो- यदमध्यस्था द्विघुल्लेखेव भास्वरा । नीवार शूक

वत्तन्वी पीता भास्वत्यणूपमा । तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः । स ब्रह्म स शिवः स हरिः सेंद्रः सोऽक्षरः परमः स्वराट् ॥

ऋतगं सत्यं परं ब्रह्म पुरुषं कृष्णपिंगळं । ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥

ॐ नारायणाय विद्महे वासुदेवाय धीमहि ।
तन्नो विष्णुः प्रचोदयात् ॥

ॐ शान्तिः शान्तिः शान्तिः